



## Maharagnya Strotra






# Maharagnya Strotra





## Maharagnya Strotra



Core Sharda

## Maharagnya Strotra

ॐ श्री महाराज्ञी भगवत्यै नमो नमः

ॐ ॐ शीतांशु बालर्कक्रुपाणु-
नेत्रा चतुर्भुजामेनत्वगासनस्थाम् ।
शङ्खाब्जशूलासिधरां महेशी
राज्ञी भजेहं तुहिनाद्रिजालाम् ॥१॥
स्मृतेवान्तर्गतं पुंसां हरन्ती सकलमलम् ।
जयत्येषा महाराज्ञी भक्तानां सुखदायिनी ॥२॥
त्रिजगन्मोहनीमेड्ये मयूरीभूतसद्गुणे ।
नमोस्तुते महाराज्ञि पाहिमां शरणागतम ॥३॥
शेषाशेषमुखागण्ये गुणीगण गणप्रिये ।
नमोस्तुते महाराज्ञि पाहिमां शरणागतम ॥४॥
सुरासुरमहेन्द्रैश वन्दनीय पादाम्बुजे ।
नमोस्तुते महाराज्ञि पाहिमां शरणागतम ॥५॥
चराचर जगत्सृष्टि स्थिति संहार कारिणी ।
नमोस्तुते महाराज्ञि पाहिमां शरणागतम ॥६॥
भक्तकल्पलतेनल्प वाञ्छापूर्येजितानले ।
नमोस्तुते महाराज्ञि पाहिमां शरणागतम ॥७॥
ब्रह्माविष्णुमहेशान वन्दिते गिरिनन्दनि ।
नमोस्तुते महाराज्ञि पाहिमां शरणागतम ॥
भक्तानां भीमसंसार पारा वार प्रतारिणी ।
नमोस्तुते महाराज्ञि पाहिमां शरणागतम ॥९॥
निर्गुणे निष्क्रिये नित्ये सच्चिदानन्दरूपिणि ।
नमोस्तुते महाराज्ञि पाहिमां शरणागतम ॥१०॥
राज्ञीस्तोत्रमिदं पुण्यं त्रिसन्ध्य प्रयतः पठन् ।
असंशयं विशेषेण वशयेदखिलंजगत् ॥११॥

ॐ इति श्री महाराज्ञि स्तोत्रं सम्पूर्णं समाप्तम् ॥

ॐ